# SRI. NAGAMANGALA NARASIMHACHARYA

# (1910 – 1959)



## नागमङ्गलनरसिंहाचार्यः

अयं लौहितगोत्रः आश्वलायनसूत्रः ऋक्शाखाध्यायी श्रीनिवासार्यस्य पुत्रः। माता सौम्यनायकी। भ्रातरः चत्वारोऽपि संस्कृत-कन्नड-तमिळ्-उर्दू-प्रभृति-भाषासु पण्डिताः सङ्गीतज्ञाः चित्रकलाशिल्पविदः नागरिक-कलाकुशलाश्च। सालग्रामशिलावत् कृष्णतरवर्णाः स्निग्धाः सुन्दराङ्गा इमे भारतस्वातंत्र्यसङ्ग्रामे शूराः सैनिकाः सैनिकसम्पादकाश्च। अयमपि तथैव। बाल्ये नागमङ्गले वाणीभूषणसंस्कृपाठशालायां अधीत्य ततः मैसूरु महाराजसंस्कृतपाठशालायां तर्कं अलंकारं च अधीतवान्। १९१० क्रिश वर्षे जन्म, १९५९ वर्षे मरणम्। अयं गान्धीमहात्मना हिन्दीविशारदपदे मद्रास् नगरे सम्मानितश्च। तुमकूरुमण्डले कन्नडसंस्कृतांग्लहिन्दी अध्यापकत्वेन कर्म कुर्वन् आसीत्। सिद्धगङ्गासंस्कृतपाठशालायां तन्मठस्वामिनां अपि शिक्षकत्वेन कंचिन् कालं आसीत्। कञ्चित् कालं तिरुपतिवेंकटेश्वरस्य भगवतः अन्तरङ्गाभिषेकादिसेवां कुर्वन् आसीत्। एतेन रचिताः उपलभ्यमानाः ग्रन्थाः एते

१ कीर्तिसेना - संस्कृतसरलगद्यकथा

२ कनकावती - ऐतिहासिकं संस्कृतखण्डकाव्यम्

३ दयाशतकस्तोत्रस्य कन्नडानुवादः

४ श्रीवेंकटेश्वर सुप्रभातस्तोत्रादीनां कन्नडानुवादः

५ प्रपन्नामृताख्यस्य चारित्रिकग्रन्थस्य कन्नडानुवादः

६ वार्तामालाख्यस्य बैबल्सदृशस्य द्राविडग्रन्थस्यानुवादः।